# वेदेषु पर्यावरणम्

डो. महेन्द्रकुमार अं. दवे
प्राचार्य
सी.बी.पटेल आर्ट्स कॉलेज, नडियाद

Page 1 to 5

परि+आङ् पूर्वकाभ्यां वृञ्,वरणे इत्यस्माद्धातो:ल्युटि प्रत्यये सिध्यति पर्यावरणमिति । वस्तुत: परित: आसमन्तात् वृणोतीति पर्यावरणमिति निष्पद्यते एवञ्चास्मिन्नेवार्थे शब्दोऽयं प्राचीन कालादेव प्रचलितोऽस्ति । भारतीयपरंपरायां वेदानामपौरषेयत्वं स्वीकृतमस्ति । वेदा: भगवत: परमेश्वरस्य नि:श्वासभूता:सन्ति । वेदेषु निगदितं प्रतिपदमस्माकं कृते परमं प्रमाणं भवति । संसारस्य सृष्टि: पञ्चतत्वेभ्यो जायते । इमानि पञ्चतत्वानि पृथ्वी-जल-तेज-वायु-आकाशाख्यानि सन्ति । तत्वानाममीषां पञ्चतन्मात्रा: शब्द-स्पर्श-रूप-रस-गन्धाख्या: भवन्ति । सृष्टिप्रपञ्चे आकाशाद्वायु:,वायोरग्नि:,अग्नेराप:अद्भ्यश्च पृथिवी सम्भवति । आकाशादिनां पञ्चतत्वानां शब्दादयो गुणा:प्रसिद्धा: । पाञ्चभौतिकशरीरमिदं पाञ्चभौतिकरङ्गमञ्चे पर्यावरण पोषणाय दूषणाय वा मानव एव प्रधानसूत्रधारोऽस्ति । पर्यावरणमानवयो: सत्ता पृथक्त्वेन कल्पयितुं न शक्यते । उभयोरन्योन्याश्रितसम्बन्ध: अपरिहार्यत्वात् । वेदानामध्ययनेन ज्ञायते यत् पर्यावरणसंरक्षणाय प्रमुखं तत्वत्रयं वर्तते -आप:वाता: ओषधयश्च ,अनेन तत्वत्रयेण पर्यावरणस्य निर्माणं भवति । यथा-

***त्रीणि छन्दांसि कवयो वि येतिरे , पुरुरूपं दर्शतं विश्वचक्षणम् ।***
***आपो वाता ओषधय: तान्येकमस्मिन् भुवन् अर्पितानि ॥*** [1]

पञ्चमहाभूतेषु केषाचित्सत्ताया:क्षयवृद्धिरस्माभिरनुभूयते,अपितु सदैव विद्यमानानां तेषां लोकोपकारितागुणस्याभिवृद्धये मन्त्रै:प्रार्थ्यतेऽनुष्ठीयते चानुष्ठानम् । यथा-

***मधुवाता ऋतायते मधुक्षरन्ति सिन्धव: माध्वीर्न: सन्त्वोषधी: ।*** [2]

अस्माकं जीवनस्य प्राणशक्तिसदृशमिदं पर्यावरणं भवति । आधुनिक विज्ञानस्य अभिवृध्या यथा नानाविधानां यन्त्राणां,निर्माणादिभि: तज्जनितानां रासायणिकद्रव्याणां दुष्प्रभावैश्च साम्प्रतं विश्वस्मिन् सर्वत्र वातावरणमेव कलुषितमितीदं सर्वाधिगतमेव । सर्वत्र पृथ्वीतेजवायोरग्निराकाशादि पञ्चभूतान्यपि दुष्प्रभावै: पर्युषिता इव दृष्यन्ते । एतस्य विपरिणामेन जना: आधिदैविकआधिभौतिकाध्यात्मिकपरितापैश्च परिपीडिता इव भाति । तथापि अस्माकं भारतीयप्राचीनसंस्कृतौ एतेषां समस्यानांपरिहारोपाया: आयुर्वेदादि शास्त्रेषु ऋग्यजुस्सामाथर्ववेदेषु कल्पसूत्रेषु च श्रौतस्मार्तयज्ञानुष्ठानानां व्याजेन पर्यावरणस्य सर्वतोरक्षणाय

---

1 **अथर्ववेद:- १८-१-१७**

2 **शुक्लयजुर्वेद:१३-२७/२९.**

अनेकानेक प्रयोगा: अतीव उपकारका: भवितुमर्हति । पर्यावरणस्य महत्वं विज्ञाय भारतीयऋषिभि: पर्यावरण संरक्षाय स्वविवेककस्य सर्वाधिक प्रयोग: कृत: ।पृथ्वीस्थले एव जैवविविधताया:पोषणं रक्षणं च कृतम् । यथा-

*यत्ते भूमि विखनामि क्षिप्रं तदपि रोहतु ।*
*मा ते मर्म विमृग्वरि मा ते हृदयमर्पितम् ॥*[3]

**ब्राह्मणग्रन्थेषु पृथिव्या उत्पत्ति विषये निगदितम् यत् प्रजापते: 'भू' शब्दस्योच्चारणात् पृथिवी जाता' इति कथितमस्ति ।** [4]

अथर्ववेदस्य द्वादशकाण्डस्य प्रथमं सूक्तं पृथिवीसूक्तमिति नाम्ना सुप्रसिद्धम् वर्तते ।अत्र पृथिवीपदेन समग्रभूमण्डलस्य ग्रहणं कृतमस्ति न तु कस्यचित् राष्ट्रविशिष्टस्य । यथा माता समग्ररूपेण माता भवति ,न च तदङ्गानि पृथक्-पृथक् रूपेण मातृत्वेन संज्ञायते , तथैव समग्रा पृथिवी मातृपदेन संबोधिता वर्तते । पृथिव्या आधारभूतानि तत्वानि बृहत् सत्यम्, उग्रमृतम्, व्रतम्, तपोमयजीवनम्, ब्रह्मतेज:, यज्ञकर्मणि, दिव्यजनार्चनं च सन्ति । भूतस्य भव्यस्य कारणरूपा पृथिवी एव विद्यते । यथा-

*सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञ:पृथिवीं धारयन्ति ।*
*सा नो भूतस्य भव्यस्य पत्न्यूरुं लोकं पृथिवी न: कृणोतु ॥* [5]

अथर्ववेदे सम्पूर्णपृथिवीसूक्तम् भूम्या सह मानवसम्बन्धै: पृथ्वीं प्रति आत्मीयता संवेदनारक्षा समृद्धिकर्तव्यादि संदेशै: परिपूर्णं विद्यते । नि:स्वार्थभावेन पृथ्वीसुरक्षया:" अनुपमोदाहरणं वैदिकसाहित्ये एव दृश्यते । तस्मिन् काले भौतिकसम्पन्नतायां विश्वास: नासीत् आवश्यकतानुरूपमेव ग्रहणं कर्तव्यं ईदृशी दृष्टिरासीत् } किन्तु अद्य मानवै: वैज्ञानिकौधोगिकप्रगतिकारणात् निर्ममतापूर्वकं पृथिव्या: दोहनं कृतम् ।तस्या: विनासं लेशमात्रमपि न विचारितम् । अस्मान् सर्वान् ये धारयन्ति ,रक्षयन्ति,पोषयति अत: पृथ्वे: माता इति कथ्यते । यथा-

*"माता भूमि: पुत्रोऽहं पृथिव्या: ।* [6]

वर्तमानकाले अपि माता स्वोत्तरदायित्वं समक् तया निर्वहन्ति किन्तु अद्य पुत्रा: स्वकर्तव्यविमुखा: दृश्यन्ते । वैदिकऋषिजना: सदैव पृथ्वीमातुरुपकारं स्मृत्वा तस्या: उत्तमस्वरूप संयोजने सन्नद्धा: आसन् । वर्तमाने जना: धनस्यसुरक्षामेव आवश्यकं मन्यन्ते । भूमि सुरक्षां प्रति तेषां अवधानं नास्ति । भूमि सर्वेषां आश्रयस्थली वर्तते । इयं सदैव सपन्ना भवेत् ईदृश्य: उपाय: कर्तव्य: । सर्वेषाम् जीवानाम् पोषयित्री,धन्यधान्य सम्पन्ना, स्वर्णादिधातुनाम् धारयित्री,आनंद प्रदायिनी पृथ्वी अस्मान् दधातु । पृथिव्या अनुकुलं कृतं कार्यं शीघ्रं सुफलं प्रददाति ।यथा-

---

[3] **अथर्ववेद:- १२-१-३५**

[4] **शतपथब्राह्मण-१४/१/२/१०.**

[5] **अथर्ववेद:- १२-१-१.**

[6] **अथर्ववेद:-१२-१-१२**

*विश्वम्भरा वसुधानि प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी ।*
*वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणे नो दधातु ।* [7]

परंतु वर्तमाने जना स्वस्वार्थवसात् पृथिवीं खननद्वारा जलकर्षणद्वारा बहु अधुक्षत् । औधोगिकविकास: महती जनसंख्या,वनानां विनाश इत्यादीनि कारणानि सन्ति यै: पृथिवी प्रदूषिता भवति । अत एव पृथिवी रक्ष इति ध्वनि: सर्वत्र श्रूयते । अथर्ववेदे सर्वसहा पृथिव्या इव सहनशीला: स्याम इति कामना कृता अस्ति । यथा-

*अहमस्मि सहमान उत्तरिनाम भूम्याम् अभीषाऽस्मि , विश्वाषडाशामाशां विषासा ॥*[8]

प्लास्टिकस्य उपयोगं कृत्वा जना: तेषाम् भूमौ क्षिपन्ति अत: अधिकाधिक प्रदूषणोत्पन्न: भवति । अद्यत्वे अस्माकमनवधानतया उपयोगं भूमिमव्यवस्थितम् करोति । भविष्ये इतोऽपि भयावहावस्था अनुमीयते । स्वसुखाय अस्माभि: भूमि:विरूपिता । पृथ्वी प्रदूषणस्य भारेण विमर्दिता ।प्रदूषणस्य प्रकोपात् पृथ्वी असमयऋतुपरिवर्तनेन प्रकटयति यत् वयं शनै: शनै: विनासं प्रति प्रवर्तयाम: । यथा अथर्ववेदे कथितम् वर्तते यत् -

*अश्व इव रजो दुधुवे वि तान् जनान् य आक्षियन् पृथिवीं यादजायत् ।*
*मन्द्राग्रेत्वरी भुवनस्य गोपा वनस्पतीनां गृभिरोषधीनाम् ॥*[9]

पञ्चभूततत्त्वेषु जलस्य महत्वपूर्णस्थानं वर्तते । पर्यावरणसंरक्षणे प्रदूषणनिवारणे च जलतत्वस्य महती उपयोगिता वर्तते । यतोहि जलमेव जीवनं जले प्राणवायु:रोगनाशकशक्तिरभिषेचनस्य तृप्तेश्च समर्थं भवति । अत एव जलं जीवनमुच्यते ।यजुर्वेदे कथितम् वर्तते यत् “ सर्वप्रथमं जलमेवोत्पन्नं जलानंतरं सृष्टि:।[10] जले जीवनशक्तिर्विद्यते जलेनैव लोके वातावरणं शुद्धं भवति । जनानां विचारशुद्धिकारणात् जना: आत्मचिन्तनं कुर्वन्ति । येन राष्ट्रस्य समाजस्य च शुद्धि: स्यात् विषयेऽस्मिन् अस्माकं वेदा: प्रेरयन्ति यत्-

*इमा आप: शिवतमा: इमा राष्ट्रस्य भेषजी: ।*
*इमा राष्ट्रस्य वर्धनीरिमा राष्ट्रमृतोपमा : ॥* [11]

यदा केनचित् निमित्तेन वापी कूपतडागसरस्सरित् समुद्रादि जलम् आकाशस्थं मेघमण्डलीयं च जलं दुष्यति तदा जलपर्यावरणं दूषितमिति ज्ञायते । नदीं नदानां जलं वर्षतौ जलौधेन अन्यदा च अपवित्रेभ्यो मलविष्ठाशवादिवस्तुनो जलप्रवाहपाताद् दूषितं भवति । तादृश्यस्य जलस्य पानार्थं प्रयोगो नैव कर्तुं शक्य । यतो हि स्नानाचमनपानेषु प्रयुक्तं अशुद्धं जलं रोदानुत्पादयति देहे । न केवलं मनुष्यगवादिप्राणिनस्तादृशेन दुर्जलेन रुग्णा भवन्ति अपितु वृक्षष्वपि तादृग् जलस्य दुष्प्रभावो भवतिती । इमा: नद्य:कल्याणकारिण्य:,इमा: राष्ट्रस्य विकाशं साधयन्ति ।आसां कारणेनैव राष्ट्रमवस्थितमस्ति । यदि नद्यो निर्जरा:शिवतमा भवन्ति,दूषिता न भवन्ति ,तदा

---

[7] अथर्ववेद:- १२-१-६.

[8] अथर्ववेद:-१२-१-५४.

[9] अथर्ववेद:- १२-१-५७

[10] अप एव ससर्जादौ तासु बीजमवासृजत् ॥ यजुर्वेद:- १-८

[11] अ.ब्रा.-८-७-२.

ओषधयो भवन्ति । तत्र जले प्रदूषणपरिष्कारार्थं मत्स्यादय: उत्पद्यन्ते अर्थात् शुद्धा:आप: समस्तं राष्ट्रंजडचेतनं च वर्धयन्ति । यदि जीवो जीवयति,तर्हि पर्यावरणं परिष्कृतं भवति । ऋगेदेऽपि त्रिषु लोकेषु जलं स्वीक्रियते । यथा- " जलमन्तरिक्षे उत्पन्नं भवति । जल नदीरूपेण प्रवहति । सर्वत्र जलमेव अस्ति ,अत्र कुत्रापि खननेन जलमुत्पन्नं भवति । जलमेव दीप्तिमान् पवित्र दिव्यगुणै: सम्पन्नमस्ति,तज्जलमस्माकं रक्षां कुर्यात् ।[12] तथाच कथयति यत् -"शुद्धे जले अमृतमौषधयश्च विराजन्ते ,येन जनानां जीवनं सुरक्षितमस्ति ।[13] येन जनानां जीवनं सुरक्षितमस्ति । जलं पीत्वैव शक्तिरागच्छति ।[14] तैत्तिरिय आरण्यके कथयति यत् -मम शरीरपुष्ट्यर्थं शुद्धा:आप: प्रस्रवन्तु , अप्रियाणि स्वादशुन्यानि अस्वास्थ्यकराणि च जलानि दूरं गच्छन्तु । अहं मम शरीराणि पवित्रेण पयसा स्वकं शरीरं परिवर्धयामि । [15] अत: अस्माकं परमकर्तव्यमस्ति यत् वाचा कर्मणा मनसा च जलस्य संरक्षणं कार्यम् । कूपवापीतदागनद्यादिजलं मनुष्यै: सदा स्वच्छं विधेयम् । अपवित्राणां मलमूत्रादि दुर्गन्धयुक्तानां पदार्थानां प्रक्षेपो जले कदापि न कार्य: ।

इत्थं वेदेषु पर्यावरणसंरक्षणं कृतमस्ति । तेषां चिन्तनानां प्रसार: जनोपयोगाय वर्तते । यदि मानव: वैदिकविषयान् तत्रस्थतत्वानि विज्ञाय स्वाचरणं विद्ध्यात् तदाचिरमेव पृथिव्यां स सुखशान्त्यो: संस्थापना स्यात् । वर्तमानकालिकी समस्या स्वत एव विनाशपथं गच्छेत् अत: यदि वयं सुखमयं शान्तिमयं आरोग्यमयञ्च जीवनं वाञ्छाम:,तर्हि अस्माभि: पर्यावरणस्य संरक्षणम् अवश्यमेव विधातव्यम् । सामाजिक पर्यावरण कथं शुद्धं स्यादिति जिज्ञासायामुच्यते तदा कथयितुम् शक्यते यत् वेदेषु अनेकेषु मन्त्रेषु उत्तमसमाजनिर्माणस्योपाया: विहिता: सन्ति यथा-

***ओऽम् ! संगच्छध्वं संवदध्वं , सं वो मनांसि जानताम् ।***
***देवा भागं यथापूर्वे संजानाना उपासते ।***
***समानो मन्त्र: समिति: समानी समान: मन:सह चित्तमेषाम् ।***
***समानं मन्त्रमभिमन्त्रये व: समानेन यो हविषा जुहोमि ।***
***समानि आकृति समाना हृदयानि च ।***
***समानमस्तु वो मनो यथा य: सुसहासित ॥*** [16]

---

[12] या आपो दिव्या उत वा स्रवन्ति खनित्रिमा उत वा या: स्वयंजा: ।
समुद्रार्थाया: शुचय: पावकास्ता: आपो देवीरिह मामवन्तु ॥- ऋग्वेद:७-४९-२

[13] अप्स्वन्तरमृतम् अप्सुभेषजम् -ऋग्वेद:-१-३०-१९.

[14] आपो हि ष्ठा मयो भुवस्ता न ऊर्जे दधातन ।
महेरणाय चक्षसे ॥ -यजुर्वेद:- ११-५०.

[15] आप: पुनन्तु पृथिवीं पृथिवीपूता पुनातु माम् ।
पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम् ॥ -तैत्तिरिय आरण्यक:-१०-३०.

[16] ऋग्वेद:- १०-१६१-१/२/३.

अथर्ववेदे पर्यावरण रक्षणार्थे कथितम् वतते यत् पृथ्व्यन्तरिक्षयोर्सम्बन्ध: दम्पत्तिस्वरूप: वर्तते । तद् यथा- 'माताभूमिधौस्पितर:' अत्र पृथ्व्यन्तरिक्षयोरन्तराले प्रसृतोऽवकाश: पर्यावरणस्यान्तर्गतमेवायाति । अस्मिन् क्षेत्रे क्षितिजलपावकगगनसमीरादीभि:पञ्चतत्वानां सर्वविधप्रदूषणं निराकृत्य पर्यावरणसंशोधनं सन्तुलनश्च विदधाति । तस्मात् कारणात् कथयति यत् " सा नो भूमि:विसृजतां माता पुत्राय मे पय: ।"[17] अर्थात् 'भूमि:सर्वान् प्राणीन: उपकरोति पुत्रवच्च पुष्णातीति ' तस्मादेव कारणात् कथयति यत्'सर्वदा प्रयतन्तो अतन्द्रिता: अनलसा एव सत्पुरुषा:सदैव भूमिमातु:परिरक्षणं पर्यावरणसंरक्षणञ्च कुर्वन्ति, यथा-

***"इदं जनासो विदथमहद् ब्रह्म वदिष्यति ।***
***न तत् पृथिव्यां नो दिवि येन प्राणान्ति वीरुध: ॥***[18]

अथर्ववेदे ऋषिणा पर्यावरण संरक्षणार्थे प्रार्थनां कुर्वन्ति यत्-

***यावती द्यावा पृथिवी वरिम्णा यावत् सप्त सिन्धवो वितष्ठिते ।***
***वाचं विषस्य दूषणीं तामितो निरवादिषतम् ॥***[19]

पर्यावरणरक्षायै अथर्ववेदे ऋषिभि: महान् प्रयासो विहित: यतोहि विषरहित (पर्यावरण प्रदूषण रहित) द्यौरेव मानवस्य कृते दिर्घायुष्यपूर्वकं स्वस्थजीवनप्रदानाय समर्थोऽस्ति अत कथयति यत् -

***द्यौष्ट्वा पिता पृथिवी माता जरामृत्युं कृणुतां संविदाने ।***
***यथा जीवा अदितेरूपस्थे प्राणापानाभ्यां गुपित: शतं हिमा: ॥***[20]

संक्षेपत: कथयितुं शक्यते यत् पर्यावरणसंरक्षणे वैदिकऋषय:तत्परा आसन् तथा चाथर्ववेदे तानि तत्वानि विद्यन्ते येषाम् परिपालनं,संरक्षणञ्च पर्यावरणसंरक्षणम् एव भविष्यतीति । शान्तिसूक्तेषु निगदितं यत् पृथिवी अन्तरिक्षं द्यौ:आप: ओषधय:वनस्पतय:विश्वेदेवा:सर्वेदेवा:शान्तिकरा: भवन्तु तथा च शान्तिभिरेव धोरं क्रूरं पापं शमयाम: सर्वं न: शान्तिकरं भवतु ।अत:पर्यावरण संरक्षणार्थे अथर्ववेदे कथितम् अस्ति यत्

***"पृथिवी शान्तिरन्तरिक्षं शान्तिर्द्यौ:शान्तिराप: शान्तिरोषधय:शान्तिर्वनस्पतय:। शान्तिर्विश्वे मे देवा: शान्ति:सर्वे मे देवा: शान्ति: शान्ति: शान्ति: शान्तिभि: ताभि: शान्तिभि: सर्वं शान्तिभि: शमयामोऽहं यदिह क्रूरं यदिहं पापं तत् शान्तं तत् शिवं सर्वमेव शमस्तु न: ॥***[21]

---

17 **अथर्ववेद:-१२-१-१०.**

18 **अथर्ववेद:-१-३२**

19 **अथर्ववेद:-४-६-२**

20 **अथर्ववेद:-२-२८-४.**

21 **अथर्ववेद:-१९-२-१४**